# अध्यापकमित्रम्

## केरलापाठावलिः

## संस्कृतम्

## पञ्चमी कक्ष्या

संस्कृतविद्यालयानां कृते

DRAFT

TEACHER TEXT BOOK
KERALA READER SANSKRIT
Standard – V
For Sanskrit Schools only

Government of Kerala
Department of General Education
State Council of Educational Research and Training (SCERT)
Kerala
2024

# वार्षिकासूत्रणम्

| क्र. | मासः | पाठाः | कालांशाः | प्रवर्त्तनानि |
|---|---|---|---|---|
| पादवार्षिकमूल्यनिर्णयः | जूण् | **गर्दभस्य मूर्खता** | 8 | कथावतरणम्।<br>कोशपरिचायनम्।<br>पदचयनम्।<br>पदपूरणम्। |
| | जूलै | **गर्दभस्य मूर्खता**<br>**अमरकोशः** | 8 | वर्णविश्लेषणम्।<br>नामपदक्रियापदविवेचनम्।<br>क्रियापदलेखनम्।<br>कथावतरणण्।<br>समानपदचयनम्।<br>सस्वरवाचनम्। |
| | आगस्त् | **अमरकोशः** | 6 | पदलेखनम्।<br>पदप्रश्नः।<br>अर्थलेखनम् |
| अर्धवार्षिकमूल्यनिर्णयः | सेप्तम्बर् | **स्नेहनीडम्** | 8 | कवितालपनम्।<br>नूतनपदचयनम्।<br>विना शव्दप्रयोगः।<br>कवितालेखनम्। |
| | ओक्टोबर् | **स्नेहनीडम्** | 8 | पदलेखनम्। |

DRAFT

| | | | | |
|---|---|---|---|---|
| | | **शास्त्रं हि महद्धरम्** | | वाक्यप्रयोगः।<br>परिचायनम्।<br>लट्- लङ् लकाराणां<br>विवेचनम् |
| | नवम्बर् | **शास्त्रं हि महद्धरम्** | 8 | जीवनचरितलेखनम्।<br>वाक्यनिर्माणम्। |
| | दिसम्बर् | **शास्त्रं हि महद्धरम्** | 8 | पदसूर्यनिर्माणम्।<br>पट्टिकापूरणम्।<br>वर्णावगमनम्। |
| वार्षिकमूल्यनिर्णयः | जनुवरि | **भवन्तु सोदराः सर्वे** | 8 | कथावतारणम्।<br>पट्टिकाकरणम्।<br>वाचनम्।<br>अर्थलेखनम्। |
| | फेब्रुवरि | **भवन्तु सोदराः सर्वे**<br>**सुभाषितानि** | 8 | पदच्छेदः।<br>पाददटिप्पणीलेखनम्।<br>वाक्यलेखनम्।<br>समानार्थकचयनम्।<br>सुभाषितालपनम्। |
| | मार्च् | **सुभाषितानि** | 8 | सुभाषितलेखनम्।<br>सुभाषितचयनम्।<br>यथोचितं योजनम्। |

DRAFT

# प्रथमम् एककम् - साहितीयम् ।

अस्मिन् एकके 'गर्दभस्य मूर्खता' इति एका चित्रकथा, 'अमरकोशम्' अधिकृत्य एकं लघुविवरणञ्च अस्ति ।

| पाठसंख्या - प्रथमः पाठः। | पाठस्य नाम - गर्दभस्य मूर्खता। |
|---|---|
| **प्रधानाशयः - भाषासाहित्यम् ।** | **उपाशयः - बालसाहित्यम् ।** |
| **कालांशः - १२** | **व्यवहाररूपम् - चित्रकथा** |

**उद्देश्यानि / लक्ष्याणि -** चित्राणाम् आशयमवगम्य कथां वदति ।
पञ्चतन्त्रकथामधिकृत्य जानाति वदति च ।

**मूल्यः / मनोभावः च -** भाषापठने उत्साहं जनयति ।

**पठनलक्ष्याणि -** कोशसाहाय्येन नूतनपदानां परिचायनं करोति ।
अकारान्त पुल्लिङ्ग शब्दं विविच्य जानाति।
केवलाव्ययानां परिचायनम् ।
लट् लकारे प्रथमपुरुषशब्दानां चयनं करोति ।
उचिताक्षरमुपयुज्य पदपूरणम् करोति ।
वर्णविश्लेषणं करोति ।
नामपदानि क्रियापदानि च विविच्य वदति ।

**पठनसामर्थ्यम् -** आशयग्रहणशेषि ।
लघुवाक्य निर्माणशेषिः ।
शब्दकोशोपयोगशेषिः ।
कथाकथननैपुणिः ।

DRAFT

**पाठस्य आमुखम्** - मूल्यबोधवर्धनात्मिका लघुचित्रकथा भवति अयं पाठः।

विष्णुशर्मणा विरचितात् पञ्चतन्त्रात् उद्धृता एषा कथा।

**प्रवेशकम्** - सर्वे कथाश्रवणे तत्पराः खलु ? कीदृशीं कथां श्रोतुं इच्छन्ति ?

पक्षिमृगादीनां कथाः वा? तादृशीम् एकां कथां पठामः ।

**पाठापग्रथनम्** - स्वावस्थामवगम्यैव कार्याणि करणीयम्। नो चेत् अस्मिन् पाठभागे विद्यमानस्य गर्दभस्य अवस्था भविष्यति । 'अन्धम् अनुकरणं विनाशाय भवति' इति अध्यापिका छात्रान् बोधयति ।

## पठनप्रवर्तनानि ।

**प्रवर्तनम् १**

चित्रं दृष्ट्वा संस्कृते वा कैरल्यां वा कांचन कथां वदति। अध्यापिका, साहाय्यं करोति । कथाकथनानन्तरं पाठभागे विद्यमानस्य अश्वपदस्य पर्यायपदानि तथा पदच्छेदञ्च लेखितुं छात्रान् प्रेरयति ।

**मूल्यनिर्णयसूचकाः** - अर्थावगमनम्।

अक्षरस्फुटता।

**प्रवर्तनम् २**

पाठपुस्तके विद्यमानं चित्रं प्रदर्श्य, अस्य काकस्य कथा सर्वे श्रुतवन्तः वा? वक्तुं शक्यते वा ? इति पृच्छति। छात्राः कैरल्यां कथां वदन्ति। अध्यापिका उक्तां कथां संस्कृतभाषया विवर्तनं कृत्वा चार्टपत्रे विलिख्य प्रदर्शयति।

कथा - एकः काकः पिपासया सर्वत्र अटति। कूपस्य समीपे एकं घटम् अपश्यत्। काकः घटस्य समीपं गत्वा घटे किञ्चित् जलमेव अस्ति इति ज्ञात्वा एकम्

DRAFT

उपायम् अचिन्तयत्। सः काक: झटिति समीपस्थानि पाषाणखण्डानि घटे निक्षिपति स्म । तदा जलं क्रमशः उपरि आगतम्। जलं पीत्वा सन्तुष्टः काकः ततः अगच्छत् ।

**मूल्यनिर्णयसूचकाः**

वाक्यघटना ।

अर्थावगमनम् ।

आशयव्यक्तता।

उचितक्रमीकरणम् ।

**प्रवर्तनम् ३**

काकः, शुनकः, मार्जार:, बालकः, शुकः, स्यूतः इत्यादि पुल्लिङ्गपदानां लघुस्फोरकपत्राणि प्रदश्र्य वचनानि परिचिनोति ।

यथा -

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| काकः | काकौ | काकाः |
| शुनकः | शुनकौ | शुनकाः |
| मार्जार: | मार्जारौ | मार्जारा: |
| बालकः | बालकौ | बालकाः |
| शुकः | शुकौ | शुकाः |
| स्यूतः | स्यूतौ | स्यूताः |

अनन्तरं स्फोरकपत्रं दत्वा क्रीडाद्वारा छात्रान् वचनानि बोधयति। ततः पाठपुस्तके विद्यमानानि प्रवर्तनानि दृष्ट्वा लेखनाय निर्दिशति ।

मूल्यनिर्णयसूचका: - उचितघटना।



DRAFT

पदज्ञानम् ।

आशयग्रहणम् ।

**प्रवर्तनम् ४**

पाठभागं पठित्वा कोष्ठके प्रदत्तानि अक्षराण्युपयुज्य रिक्तस्थानानि पूरयितुं निर्दिशति।

यथा - व्यापारी , गदर्भः, गोणिका ।

मूल्यनिर्णयसूचकाः

अर्थावगमनम् ।

अक्षरज्ञानम् ।

पदज्ञानम् ।

**प्रवर्तनम् ५**

नामपदानि क्रियापदानि च लिखन्ति।

अध्यापिका कक्ष्यायाम् आगत्य चार्टपत्रे / ICT द्वारा" बालकः पठति " इति वाक्यं चित्रसाहाय्येन प्रदर्शयति वाचयति च । ततः अध्यापिका प्रश्नान् पृच्छति । `कः' पठति? इति । छात्राः वदन्ति 'बालकः' ।

बालकः किं करोति ? इति प्रश्नस्य उत्तररूपेण पठति इति छात्राः वदन्ति । एवं बहुविधानि उदाहरणानि प्रदर्श्य छात्रान् वक्तुं प्रेरयति ।

पिकः गायति ।

शिशुः पिबति ।

शुकः वदति।

पिता गच्छति ।

मातुलः खादति ।

DRAFT

इत्यादि वाक्येभ्यः नामपदं क्रियापदं च विविच्य वक्तुं प्रेरयति। ततः अध्यापिकायाः साहाय्येन लिखन्ति । पाठभागे विद्यमानानि प्रवर्तनानि छात्राः वदन्ति लिखन्ति च ।

| नामपदानि | क्रियापदानि |
|---|---|
| शर्करा | पिबति |
| जलम् | हसति |
| नदी | लिखति |
| अश्वः | पठति |
| कार्पासः | गायति |
| गर्दभः | |

**मूल्यनिर्णयसूचकाः**

पदज्ञानम् ।

उचित क्रमीकरणम् ।

**प्रवर्तनम् ६**

वर्णविश्लेषणम् ।

अध्यापिका चार्टपत्रे/ICT द्वारा एकैकाक्षरस्य वर्णविश्लेषणम् लिखित्वा प्रदर्शयति ।

यथा - क = क् +अ

की= क्+ ई

कू = क् +ऊ

को= क्+ ओ

कं =क्+ अं

DRAFT

एवम् अन्यानि अक्षराणि लेखितुं छात्रान् प्रेरयति, अध्यापिका साहाय्यं करोति । अनन्तरं पदानि दत्वा लेखनाय प्रेरयति, साहाय्यमपि करोति ।

**मूल्यनिर्णयसूचका:**

अक्षरज्ञानम् ।

पदज्ञानम्।

**प्रवर्तनम् ७**

**यथोचितं योजयतु**

पदानुसारं चित्रं योजयितुं छात्रान् प्रेरयति।

| | | |
|---|---|---|
| कार्पासः | - | പഞ്ഞിക്കെട്ട് |
| नदी | - | നദി |
| अश्वः | - | കുതിര |
| गर्दभः | - | കഴുത |
| गोणिका | - | ചാക്കുകെട്ട് |

**मूल्यनिर्णयसूचका:**

पदज्ञानम् ।

अर्थज्ञानम् ।

**संयोजकप्रवर्तनम् ।**

पाठभागस्थानि पदानि चार्टपत्रे विलिख्य प्रदर्शयति। तानि पदानि अक्षरमालाक्रमानुसारं लेखितुं प्रेरयति। लिखितपदे अश्व शब्दस्य नामान्तराणि अपि सन्ति। एतादृश नानापदार्थं प्राप्तुं एकं कोशग्रन्थमस्ति इत्युक्तवा द्वितीयपाठे प्रविशति।

DRAFT

| पाठसंख्या - द्वितीयःपाठः | पाठस्य नाम - अमरकोशः |
|---|---|
| प्रधानाशयः - भाषासाहित्यम् । | उपाशयः - वैज्ञानिकसाहित्यम् । |
| कालांशः - १० | व्यवहाररूपम् - लघुविवरणम् |

**उद्देश्यानि / लक्ष्याणि** - संस्कृतवैज्ञानिकसाहित्ये वर्तमानान् कोशग्रन्थान् परिचिनोति ।

कोशग्रन्थेषु अमरकोशस्य प्राधान्यम् अवगच्छति।

**मूल्यः / मनोभावः** - भाषापठने औत्सुक्यम् उत्साहश्च वर्धते।

कोशग्रन्थानां निरीक्षणेन पदानामर्थं तेषां समानार्थक, नानार्थक शब्दानां ज्ञानञ्च सम्पादयति।

**पठनलक्ष्याणि** - नूतनपदानामर्थं शब्दकोशं निरीक्ष्य वदति लिखति च।

पदानां समानार्थकपदानि परिचिनोति विवेचयति च ।

क्रियापदानि वदति लिखति च।

**पठननैपुणिः** - इतरभाषानिघण्टून् परिचिनोति। तेषां प्रयोजनम् उपयोगितां शैलीं च अधिकृत्य लघुटिप्पणीः लिखति।

शब्दकोशान् निर्माति ।

**पाठस्य आमुखम्**

आशयविनिमयोपाधिरेव भाषा ।विश्वेऽस्मिन् अनेकाः भाषाः सन्ति। तासु तारतम्येण प्राचीना भवति संस्कृतभाषा । तत्रापि विविधानि साहित्यवैज्ञानिक- शास्त्राणि सन्ति । वैज्ञानिकशास्त्रेषु प्रथमगणनीयाः भवति निघण्टवः । संस्कृतभाषायां प्रथम शब्दकोशः भवति नामलिङ्गानुशासनमित्यपरनाम्ना प्रथितः अमरसिंहेन विरचितः

DRAFT

अमरकोशः । अस्मिन् ग्रन्थे त्रीणि काण्डानि सन्ति इत्यनेन अयं त्रिकाण्डी' इति नाम्नापि प्रसिद्धः भवति ।

पद्यरूपेण रचिते अस्मिन् शब्दकोशे उपदशसहस्रःश्लोकाः सन्ति। कैकुलङ्ङर रामवारियर् महोदयस्य बालप्रिया, सि.टि परमेश्वरन् मूसत् महोदयस्य पारमेश्वरी च अस्याः प्रसिद्धे व्याख्ये।

**प्रवेशकप्रवर्तनम्**

प्रथमपाठे अश्वशब्दस्य समानार्थकानि पदानि ज्ञातवन्तः खलु ? एतादृशानाम् अन्यपदानां समानार्थकपदानि ज्ञातवन्तः वा? सूर्यः,रविः,भास्करः, आदित्यः, दिवाकर : इत्यादिनि नामानि ज्ञातवन्तः किल?एतानि सर्वाणि सूर्यस्य नामान्तराणि भवन्ति । एवम् अन्यशब्दानां नामान्तराणि पठितुं एकः शब्दकोशः अस्ति। स एव अमरसिंहस्य अमरकोशः । तमधिकृत्य पठामः।

**पठनप्रवर्त्तनानि**

अध्यापिका कक्ष्यां प्रविश्य पूर्वपठितानि पदानि समानपदानि च परिचिनोति।

यथा - नेत्रम् – नयनम्, अक्षि, चक्षुः ।

वनम् – काननम्, अटवी, विपिनम्।

**प्रवर्तनम् १**

समानपदानि चित्वा वदति लिखति च ।

वृक्षः – शाखी, विटपी, तरुः।

सुमम् – कुसुमं, सूनं, पुष्पम्।

DRAFT

**मूल्यनिर्णयसूचकाः**

उचितपदचयनम्।

अर्थावगमनम्।

चित्रं दृष्ट्वा पदज्ञानम्।

**प्रवर्तनम् २**

क्रियापदलेखनम्

प्रथमपाठे नामपदानि क्रियापदानि च पठितवन्तः किल?

क्रियापदानि वक्तुं प्रेरयति ।

यथा – क्रीडति, पचति, वदति, पठन्ति,धावति, डयते, वर्तते,

लिखन्ति, वन्दते, गच्छन्ति ।

एवं पाठभागे अपि क्रियापदानि सन्ति । भवन्तः पाठभागं पठित्वा वैयक्तिकतया क्रियापदानि लिखन्तु । तदनन्तरं सङ्घे उपविश्य स्वालित्यनिवारणं कृत्वा वाचयतु।

सन्ति

भवन्ति

भवति

डयते।

**प्रवर्तनम् ३**

गणे नान्तर्भवति ।

अध्यापिका स्फोरकपत्राणि  निर्माय छात्रेभ्य : ददाति । दत्ते पत्रे लिखितसंख्यानुसारं संङ्घरूपीकरणाय निर्दिशति । ततः अध्यापिकायाः

DRAFT

साहाय्येन अर्थम् अवगम्य समानार्थकपदानि सञ्चित्य एकत्र स्थापयति।

गणे ये शब्दा: न अन्तर्भवति तान् अन्यत्र स्थापयति।

यथा –

1) बालकः, कूपः, रमा, मण्डूक:

2) सिंहः ,कपोत:, व्याघ्रः, कलभः

एवं पाठपुस्तकस्थं प्रवर्तनं लेखितुं छात्रान् प्रेरयति।

(अ) स्नेहः (आ) प्रगतिः (इ) अचला।

मूल्यनिर्णयसूचकाः।

निरीक्षणपाटवम्।

अर्थज्ञानम्।

पदज्ञानम् ।

प्रवर्तनम् ४

पाठभागे विद्यमानं शब्दकोशं निरीक्ष्य दत्तानां पदानाम् अर्थं लिखतु।

| | | |
|---|---|---|
| बहव: | - | अनेके । |
| विरचितः | - | लिखित: । |
| अटवी | - | वनम् । |
| प्रथितः | - | प्रसिद्धः । |
| निघण्टवः | - | कोशग्रन्थाः । |

मूल्यनिर्णयसूचका: ।

अर्थग्रहणम्

DRAFT

पदज्ञानम्।

निरीक्षणपाटवम् ।

**प्रवर्तनम् ५**

सन्धिकार्यम्

अच् सन्धि:, हल् सन्धि :, विसर्गसन्धि: चेति सन्धि : त्रिविधा:। तेषु अच्सन्ध्यौ अन्तर्भवति दीर्घसन्धिः ।

<u>सवर्णदीर्घसन्धिः।</u>

अ + अ = आ

इ + इ = ई

उ + उ = ऊ

अ + आ = आ

आ + आ = आ

यथा –

तथापि = तथा + अपि

कस्यापि = कस्य + अपि

एवं पाठपुस्तके विद्यमानानि प्रवर्तनानि कर्तुं छात्रान् प्रेरयति ।

यथा -

कुत्र + अपि

अत्र + अपि

DRAFT

**मूल्यनिर्णयसूचका: ।**

उचितलेखनम् ।

**प्रवर्तनम् ६**

**पदप्रश्नः**

सर्वे बालरमा, कलिक्कुटुक्का , बालभूमिः. च श्रुतवन्तः वा ? केषां गृहे एतानि पुस्तकानि सन्ति ? के के पठन्ति ते ? तेषु पुस्तकेषु कानि कानि विषयाणि सन्ति ? कथा, कविता,चित्रकथा, पदप्रश्नाः, इत्यादयः सन्ति खलु ? तादृशं एकं पदप्रश्नम् अत्रापि कुर्मः इत्युक्त्वा अध्यापिका पाठभागे दत्तं प्रश्नं पृच्छति ।

| | | | | |
|---|---|---|---|---|
| ल | तः | थि | प्र | हः |
| त्रि | सू | न्थः | सिं | म |
| का | नम् | र | प | ही |
| ण्डी | म | भा | षा | रू |
| अ | न्ति | व | भ | हः |

क) त्रिकाण्डी

ख) सूनम्

ग ) भवन्ति

घ) अमरसिंह:

ङ) भाषा

च) प्रथितः

छ) महीरुहः

DRAFT

**मूल्यनिर्णयसूचका:**

अर्थावगमनम्

पदज्ञानम्

उचितयोजनम्

**प्रतीक्षितोत्पन्नम्** - लघुसंस्कृतशब्दकोशः ।

**संयोजकप्रवर्तनम्**

अस्मिन् पाठभागे पदस्य समानपदान् पठितवन्तः खलु? इतोऽपि पठितुं उत्सुकाः भवेत् वा? एवं शास्त्रं पठितुम् उत्सुकाः वा? शास्त्रस्य कौतुकं तथा स्नेहसम्पन्नं समूहञ्च पठितुं तात्पर्यम् अस्ति वा? तादृशमेककं पठामः?

**अनुबन्धः**

1. चक्रीवन्तस्तु वालेया रासभाः गर्दभा खराः। - गर्दभः
2. घोटके वीतितुरगतुराङ्गाश्वतुरङ्गमाः । - अश्व :
3. आपणस्तु निषाधायां विपणिः पण्यवीथिका। - विपणिः
4. वाल्कं क्षौमादि फालं तु कार्पासं बादरं च तत् ।
   कौशेयं कृमिकौशोत्थं शङ्कवं मृगरोमदम् ।। कार्पास :
5. उन्दुरुर्मूषकोऽप्याखुर्गिरिकाबालमूषिका ।
   सरटः कृकलासः स्यान्मुशलीगृहगोधिका ।। मूषकः
6. सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः
   कण्ठीरवो मृगारिपूर्मृगदृष्टिर्मृगाशनः ।
   पुण्डरीकः पञ्चनखचित्रकायमृणाद्विषः
   शार्दूलद्विपिनौ व्याघ्रो तरक्षुस्तु मृगादनः ॥ सिंहः

**अन्तलिङ्गविभक्तिवचनानि**

| | | |
|---|---|---|
| स्त्रियः | - | ईकारान्त स्त्रीलिंग स्त्री शब्दस्य प्रथमा बहुवचनम्। |
| सुमनसः | - | सकारान्तः स्त्रीलिङ्गः प्रथमा बहुवचनम् । |
| पुष्पम् | - | अकाशन्तः नपुंसकलिङः प्रथमा एकवचनम् । |
| प्रसूनम् | - | अकारान्तः नपुंसकलिङ्गः प्रथमा एकवचनम्। |
| कुसुमम् | - | अकारान्तः नपुंसकलिङ्गः प्रथमा एकवचनम्। |

DRAFT

| | | |
|---|---|---|
| सुमम् | - | अकारान्तः नपुंसकलिङ्गः प्रथमा एकवचनम्। |
| वृक्षः | - | अकारान्तः पुल्लिङ्गः प्रथमा एकवचनम्। |
| महीरुहः | - | अकारान्तः पुल्लिङ्ग: प्रथमा एकवचनम्। |
| शाखी | - | नकारान्तः पुल्लिङ्ग: प्रथमा एकवचनम्। |
| विटपी | - | नकारान्तः पुल्लिङ्ग: प्रथमा एकवचनम्। |
| पादपः | - | अकारान्तः पुल्लिङ्गःप्रथमा एकवचनम्। |
| तरुः | - | उकारान्तः पुल्लिङ्ग: प्रथमा एकवचनम्। |
| प्रेम | - | नकारान्तः पुल्लिङ्ग: प्रथमा एकवचनम्। |
| प्रियता | - | आकारान्तः स्त्रीलिङ्गः प्रथमा एकवचनम्। |
| हार्दम् | - | अकाशन्तः नपुंसकलिङः प्रथमा एकवचनम्। |
| स्नेहः | - | अकारान्तः पुल्लिङ्गःप्रथमा एकवचनम्। |

DRAFT

# द्वितीयम् एककम् - शास्त्रकौतुकम्।

अस्मिन् एकके 'स्नेहनीडम्' इति एका कविता "शास्त्रं हि महद्वरम्" इति एकं विवरणञ्च अस्ति ।

| पाठसंख्या - तृतीयःपाठः | पाठस्य नाम - स्नेहनीडम् |
|---|---|
| प्रधानाशयः - मानविकता । | उपाशयः - स्नेहः । |
| कालांश: - १२ | व्यवहाररूपम् – कविता। |

**उद्देश्यानि /लक्ष्याणि** - कवितां श्रुत्वा आशयम् अवगच्छति वदति च ।

कविता सतालम् आलपति ।

**मूल्य:/ मनोभावः** - मानविकगुणेषु सविशेषः भवति स्नेहः ।

मानवजीवने स्नेहस्य प्राधान्यं अतुल्यं भवतीति अवगच्छति।

**पठनसामग्र्यः** - बालकविता पुस्तकानि ।

**पठनलक्ष्याणि** - नूतनपदानि परिचिनोति ।

'विना' शब्दस्य प्रयोगं परिचिनोति ।

लट् लकारे उत्तमपुरुषपदानां चयनं करोति ।

अमरकोशस्य साहाय्येन समानपदानां चयनं करोति ।

अस्मद् शब्दं परिचिनोति ।

**पठननैपुणिः** - कवितालपनाय शेषिं वर्धयति ।

DRAFT

**पाठस्य आमुखम्**

सर्वेषां प्राणिनां सहजस्वभाव: भवति स्नेहः । आधुनिककाले स्नेहः,दया, अनुकम्पा इत्यादिनां वैरल्यं दृश्यते । कैरल्यां कुमारनाशान् महोदयस्य इयं कविता स्नेहस्य प्राधान्यम् उद्घोषयति।

സ്നേഹമാണഖിലസാരമൂഴിയിൽ
സ്നേഹസാരമിഹ സത്യമേകമാം
മോഹനം ഭുവനസംഗമിങ്ങതിൽ
സ്നേഹമൂലമമലേ! വെടിഞ്ഞു ഞാൻ

(കുമാരനാശാൻ - നളിനി)

तथा उल्लूर महोदयेन विरचितं प्रेमसङ्गीतम् नाम गीतकस्य प्रथमं पद्यं पश्यामः

ഒരൊറ്റ മതമുണ്ടുലകിന്നുയിരാം പ്രേമമതൊന്നല്ലോ
പരക്കെ നമ്മെ പാലമൃതൂട്ടും പാർവണശശിബിംബം.

(ഉള്ളൂർ എസ് പരമേശ്വരയ്യർ - പ്രേമസംഗീതം)

इत्यादि। एतादृशीं एकां स्नेहसम्बन्धिनीं कवितां पठामः ।

**प्रवेशकप्रवर्तनम् ।**

माता शिशुं लालयति किल ? सर्वे मातृस्नेहम् इच्छन्ति वा ? तथा प्रकृतिः सर्वे जीवजालान् लालयति । भेदभावेन विना मनुजाः सर्वान् स्नेहेन पश्यन्ति चेत् अयं लोकः कीदृशं सौन्दर्यं लभते । तादृशं स्नेहसम्पन्नतां मानविकतां च उद्घोषयन्तीम् एकां कवितां पठामः ।

**पाठापग्रथनम् ।**

मनुष्याणां परस्परं तथा जीवजालेषु च स्नेहभावं परिपोषयितुम् अयं पाठ: उपकरोति। सहजीविस्नेहं, दया, अनुकम्पा च एतया कवितया प्रतिपाद्यते ।

DRAFT

**पठनप्रवर्तनानि ।**

**प्रवर्तनम् १**

कवितां सतालमालपतु ।

छात्रान् संघं कृत्वा कवितालपनाय निर्दिशति ।वैयक्तिकरीत्या आलपनाय छात्रान् प्रेरयति। क्लेशेषु संजातेषु अध्यापिका साहाय्यं करोति च ।

**मूल्यनिर्णयसूचकाः ।**

अर्थावगमनम् ।

आशयव्यक्तता ।

आलपनसामर्थ्यम् ।

**प्रवर्तनम् २**

नूतनपदानाम् अर्थलेखनम् ।

पाठभागं पठित्वा नूतनपदानां चयनं कर्तुं छात्रान् प्रेरयति । ततः लब्धानां नूतनपदानाम् अर्थं शब्दकोशं निरीक्ष्य लेखितुं निर्दिशति ।

यथा-

| | | |
|---|---|---|
| नीडम् | - | कुलायम् |
| सौशील्यम् | - | सत् शीलम् |
| समानता | - | तुल्यता |
| सदा | - | सर्वदा |
| श्रेष्ठः | - | उत्कृष्टः |

**मूल्यनिर्णयसूचकाः ।**

पदज्ञानम् ।

DRAFT

अर्थावगमनम् ।

निरीक्षणसामर्थ्यम् ।

**प्रवर्तनम् ३**

अध्यापिका वाक्यद्वयं दत्वा 'यत्र – तत्र' उपयुज्य एकवाक्येन योजयितुं छात्रान् निर्दिशति ।

**यथा -**

* ग्रन्थालयः अस्ति । पुस्तकानि सन्ति ।

यत्र ग्रन्थालयः अस्ति तत्र पुस्तकानि सन्ति ।

* सूनम् विकसति । सुगन्धः प्रसरति । ।

यत्र सूनम् विकसति तत्र सुगन्धः प्रसरति ।

* अग्निः वर्तते । तापः भवति ।

यत्र अग्निः वर्तते तत्र तापः भवति ।

* परिश्रमः भवति । विजयः भविष्यति । 1

यत्र परिश्रमः भवति तत्र विजयः भविष्यति ।

एतादृशैः उदाहरणैः "यत्र-तत्र" योजनाय छात्राणां परिशीलनं दत्वा पाठपुस्तकस्थं प्रवर्तनं कर्तुं निर्दिशति ।

यत्र नदी अस्ति तत्र मीनाः सन्ति ।

यत्र मधुरम् अस्ति तत्र पिपीलिकाः सन्ति ।

यत्र मालिन्यम् अस्ति तत्र रोगाः सन्ति ।

**मूल्यनिर्णयसूचकाः ।**

उचितप्रयोगः ।

DRAFT

आशयावगमनम् ।

पदज्ञानम् ।

**प्रवर्तनम् ४**

सार्थकं पदं लिखतु ।

पाठभागं पठित्वा दत्तानि अक्षराणि उपयुज्य सार्थकपदलेखनाय छात्रान् प्रेरयति ।

स्नेहनीडम् । विलसन्ति ।

सुमानसाः । समानता ।

परस्परम् ।

**मूल्यनिर्णयसूचकाः**

अक्षरज्ञानम् ।

पदज्ञानम् ।

उचितघटना ।

**प्रवर्तनम् ५**

**"विना" शब्दप्रयोगः ।**

कोष्ठके दत्तां सूचनाम् अनुसृत्य वाक्यं पूरयतु ।

पुस्तकं विना सा न पठति ।

बालिका शर्करया विना क्षीरं न पिबति ।

**मूल्यनिर्णयसूचकाः ।**

वाक्यघटना ।

आशयावबोधः ।

**संयोजकप्रवर्तनम्**

DRAFT

स्नेहसम्पन्नसमूहे जीवन्ति चेत् अस्माकं मनसि सन्तोषदायकं भवति। यदा प्रकृतिरमणीयताम् आस्वादयितुं शक्यते तदा प्रकृतिं ज्ञातुं प्रेरयति।तादृशमेकं पाठं पठामः।

**अनुबन्धः**

**अन्वयः**

यत्र सौशील्यं , दया, समानता च वर्तन्ते, तत्र स्नेहवर्णाः शोभया सदा विलसन्ति।

विश्वकल्याणकारकः स्नेहः हि भूमौ एकधनं ( भवति)।परस्परं भावयित्वा अस्मिन् स्नेहनीडे वसामः।

अयं श्रेष्ठः अयं नेतिः भेदभावमतिं विना वयम् अत्यन्तस्नेहसान्द्रसुमानसाः भवामः।

**आशयः**

यत्र शोभनं शीलम् अन्येषु दया समस्तजीविनां प्रति तुल्यता च वर्तन्ते, तत्र स्नेहस्य वर्णाः मनोहारितया परिलसन्ति।

धरायां लोकमङ्गलकारकः एकोऽहि धनं तत् एव स्नेहः। परस्परं भावयित्वा अस्मिन् स्नेहनीडे वसामः।

अयं श्रेष्ठः अयं न इति भेदबुद्धिं विना वयम् अतीव स्नेहेन सन्द्रीभूतसुमानसाः भवामः।

DRAFT

| पाठसंख्या - चतुर्थःपाठः | पाठस्य नाम - शास्त्रं हि महद्वरम्। |
|---|---|
| प्रधानाशयः - शास्त्रबोधः। | उपाशयः - अन्वेषणमनोभावः। |
| कालांश: - १३ | व्यवहाररूपम् – विवरणम्। |

**उद्देशयानि/लक्ष्याणि** - वर्णान् विवेचयति।

संस्कृते विविधशास्त्राणां तथा शास्त्रज्ञानां च परिचायनं करोति।

**मूल्यः/मनोभावः** - शास्त्रावबोधः छात्रेषु वर्धयति।

**पठनसामग्र्यः** - शास्त्रावबोधपुस्तकानि, शास्त्रज्ञानम् अधिकृत्य ICT (Video clips)

**पठनलक्ष्याणि** - लट् - लङ् च रूपाणि अवगच्छति लिखति च।

यदा-तदा उपयुज्य वाक्यनिर्माणम्।

रामन् प्रभावमवगच्छति।

जीवनचरितस्य लेखनपरिचायनं करोति।

नूतनपदानि परिचिनोति।

**पठननैपुणीः** - शास्त्रावबोधः।

**पाठस्य आमुखम्**

प्रसिद्ध भारतीयशास्त्रज्ञानां नामानि जानन्ति वा? आर्यभटः , मयः, चरकः, सुश्रुतः, श्रीनिवासरामानुजः, सि.वि रामन् इत्यादयः भारतीयशास्त्रज्ञाः भवन्ति। सि.वि रामन् महोदयस्य रामन् प्रभावः इति सिद्धान्तः नोबल् पुरस्कारेण पुरस्कृतः ।विविध

DRAFT

शास्त्रशाखा:, शास्त्रकारान् च परिचिनोतुम् अनेन पाठेन शक्यते। इन्द्रधमनुषःपठनेन वर्णान् (रूपान्) अपि पठितुम् अयं पाठः उपकरोति।

**प्रवेशकप्रवर्तननम् ।**

सागरस्य वर्णः कः ? इन्द्रधनुषः वर्णाः जानाति वा? एतादृश कार्याणि अस्मिन् पाठभागे अन्तर्भवति। पाठभागे दत्तं चित्रं दृष्ट्वा तत्र किं किं अस्ति इति वक्तुं छात्रान् प्रेरयति । चित्रे इन्द्रधनुः, नीलाकाश: महानौका च अन्तर्भवति । छात्रान् एवं पृच्छति - इन्द्रधनुषः उद्भवः कथम् इति।प्रश्नानाम् उत्तराय अयं पाठं पठामः ।

**पाठापग्रथनम्**

अस्मिन् पाठभागे" रामन् प्रभावः " किमिति वदति। संस्कृतवाङ्मये विद्यमानानां शास्त्राणां तथा शास्त्रज्ञानाञ्च परिचायनं करोति।

**पठनप्रवर्तनानि**

**प्रवर्तनम् १**

## रामन् प्रभावः।

ദ്രാവങ്ങളിലൂടെ കടന്നുപോകുന്ന പ്രകാശത്തിന്റെ വിസരണവുമായി ബന്ധപ്പെട്ട പ്രതിഭാസത്തെ കുറിച്ചുള്ള സിദ്ധാന്തമാണ് രാമൻ പ്രഭാവം. കടലിന് നീലനിറം എങ്ങനെ ലഭിക്കുന്നു എന്ന ചോദ്യമാണ് ഈ പ്രതിഭാസത്തിന്റെ വിശദീകരണം കണ്ടെത്താൻ അദ്ദേഹത്തെ പ്രേരിപ്പിച്ചത് . ഒരു സുതാര്യമാധ്യമത്തിലൂടെ കടന്ന് പോകുമ്പോൾ പ്രകീർണ്ണനം സംഭവിക്കുന്ന ഏകവർണ്ണ പ്രകാശത്തിൽ ചെറിയൊരു ഭാഗത്തിന് തരംഗ ദൈർഘ്യത്തിൽ വ്യത്യാസമുണ്ടാക്കുന്ന പ്രതിഭാസമാണ് രാമൻ പ്രഭാവം( രാമൻ ഇഫക്ട്). 1928 ഫെബ്രുവരി 28 ന് ഇത് പ്രസിദ്ധീകരിക്കുകയും 1930- ൽ ഭൌതികശാസ്ത്രത്തിനുള്ള നോബേൽ സമ്മാനം ലഭിക്കുകയും ചെയ്തു. ഇതിന്റെ ഓർമ്മക്കായി ഫെബ്രുവരി 28 ദേശീയശാസ്ത്രദിനമായി ആചരിക്കുന്നു. 1954 ൽ ഭാരതരത്ന അവാർഡ് നൽകി രാഷ്ട്രം അദ്ദേഹത്തെ ആദരിച്ചു.

DRAFT

**प्रवर्तनम् २**

कोष्ठके दत्ताः सूचनाः अनुसृत्य सि.वि. रामस्य जीवनचरितं रचयतु । जीवनचरितलेखनम् ।सि. वि रामन् ।श्री चन्द्रशेखरवेङ्किट्टरामः १८८८ तमे वर्षे नवम्बर् ७ दिनाङ्के तमिलनाडू राज्ये तिरुच्चिरपल्लि देशे जनिमलभत। तस्य पिता **चन्द्रशेखररामानन्दन् अय्यर्** माता **पार्वती अम्माल्** च आस्ताम्। तस्य भार्यायाः नाम लोकसुन्दरी अम्माल् आसीत्। १९२८ तमे वर्षे फिब्रवरी मासस्य २८ दिनाङ्के रामन् प्रभावः इति प्रतिभासं प्रत्यभिज्ञातम्। एतेन प्रभावेन सः १९३० तमे वर्षे भौतिकशास्त्रविषये नोबल् पुरस्कारेण आदृतः च । १९५४ तमे वर्षे भारतरत्नपुरस्कारम् अलभत। सः १९७० तमे वर्षे नवम्बर मासस्य २२ दिनाङ्के दिवङ्गतः।

**मूल्यनिर्णयसूचकाः**

वाक्यघटना ।

क्रियापदज्ञानम् ।

विभक्तिज्ञानम्।

अनुबन्धे दत्तस्य सूचनानुसारं छात्राः जीवनचरितं लिखतु। .

**प्रवर्तनम् ३**

इन्द्रधनोः वर्णं पाठपुस्तके अस्ति । तत् वर्णं दृष्ट्वा एतानां पुष्पाणां नामानि लिखतु।

यथा - नीललोहित वर्णः।

जम्बूवर्णः।

नीलवर्णः।

हरितवर्णः।

पीतवर्णः।

DRAFT

नारङ्गवर्णः।

रक्तवर्णः।

**प्रवर्तनम् ४**

यथोचितं योजयतु।

पाठभागं पठित्वा भारतीयशास्त्राणां तस्य शास्त्रज्ञानां च नामानि यथोचितं योजयतु ।

| शास्त्राणि | शास्त्रकाराः |
|---|---|
| खगोलशास्त्रम् | आर्यभटः |
| भैतिकशास्त्रम् | सि. वि. रामन् |
| गणितशास्त्रम् | श्रीनिवास रामानुजः |
| आयुर्वेदशास्त्रम् | चरकः |
| वास्तुशास्त्रम् | मयः |

DRAFT

**प्रवर्तनम् ५**

**पट्टिकापूरणम्**

अध्यापिका कक्ष्यायां कानिचन वाक्यानि चार्टपत्रे विलिख्य प्रदर्शयति ।

यथा -

१) पिता कार्यलयं गच्छति ।

पिता कार्यालयम् अगच्छत् ।

२) काकः नीडे ससुखं वसति ।

काक: नीडे ससुखम् अवसत् ।

3) शुकः वदति।

**शुकः अवदत् ।**

एवं कानिचन उदाहरणानि दत्वा लट् लङ् लकारयोः भेदाः छात्रान् बोधयति । तदनन्तरं पाठपुस्तके प्रदत्तं प्रवर्तनं कर्तुं प्रेरयति ।

पट्टिकां पूरयतु -

| लट् | लङ् |
|---|---|
| भवति | अभवत् |
| क्रीडति | अक्रीडत् |
| पठति | अपठत् |
| गच्छति | अगच्छत् |
| अस्ति | आसीत् |

DRAFT

**प्रवर्तनम् ६**

यदा - तदा

अध्यापिका कानिचन वाक्यानि "यदा - तदा" उपयुज्य वाक्यपूरणं कृत्वा चार्टपत्रे प्रदर्शयति।

यथा -१) शुनकः भषति । छात्राः धावन्ति ।

यदा शुनकः भषति तदा छात्राः धावन्ति ।

२) वृष्टिः वर्षति ।छत्रम् उद्घाटयति।

यदा वृष्टिः वर्षति तदा छत्रम् उद्घाटयति ।

ततः पाठपुस्तके प्रदत्तस्य उदाहरणानुसारं दत्तानि वाक्यानि लेखनाय अध्यापिका साहाय्यं करोति ।

१) यदा  अध्यापकः कक्ष्यां प्रविशति तदा छात्राः उत्तिष्ठन्ति ।

२) यदा श्याममेघाः आगच्छन्ति तदा मयूराः नृत्यन्ति ।

**मूल्यनिर्णयसूचकाः ।**

उचित प्रयोगः ।


आशयावगमनम् ।

पदज्ञानम् ।

**प्रवर्तनम् ७**

पदसूर्य निर्माणम् ।

पाठपुस्तके दत्तस्य अमारकोशं दृष्ट्वा कोष्ठकात् जलस्य पर्यायपदानि चित्वा पदसूर्यं पूर्तीकरोतु ।




DRAFT

**मूल्यनिर्णयसूचकाः**

अर्थावगमनम्।

पदज्ञानम्।

**संयोजकप्रवर्तनम्**

संस्कृतसाहित्ये विद्यमानाः शास्त्राणां शास्त्रज्ञानाञ्च ज्ञानं अनेन पाठेन लभते। साहित्यशास्त्रपठनेन छात्राणां मनसि मूल्यबोधं पौरबोधञ्च वर्धयितुं, तेन उत्तमपौरान् स्रष्टुं शक्यते। तादृशां पौरबोधवर्धनात्मिकां कथां सुभाषितञ्च पठामः।

**अनुबन्धः**







DRAFT

# तृतीयम् एककम् - नैतिकम्।

**एककस्य स्वभावः** अस्मिन् एकके "भवन्तु सोदराः सर्वे" इति एका कथा, "सुभाषितञ्च" अन्तर्भवति ।

| पाठसंख्या - पञ्चमः पाठः | पाठस्य नाम - भवन्तु सोदराः सर्वे |
| --- | --- |
| प्रधानाशयः - भरणव्यवस्थामूल्यानि । | उपाशयः - पौरबोधम् । |
| कालांशः - १४ | व्यवहाररूपम् – कथा। |

**उद्देश्यानि/ लक्ष्याणि** - पौरबोधमधिकृत्य चर्चां करोति वदति च ।
पौरबोधवर्धकानाम् आशयानां पादटिप्पणीं लिखति ।

**मूल्यः / मनोभावः** - पौरबोधः, भरणघटनामूल्यानि अधिकृत्य अवबोधं वर्धयितुं शक्यते ।

**पठनसामग्र्यः** - पौरबोधसम्बन्धीनि, भरणघटनामूल्यानि च अधिकृत्य video clips (मधुवाणी कथा)

**पठनलक्ष्याणि** - पाठभागात् पदानामर्थं शब्दकोशं निरीक्ष्य लिखति ।
पाठभागात् संश्लिष्टपदानि विग्रहपदानि च लिखति।
पाठभागात् लङ् लकाररूपाणि विविच्य
त्त्वान्त - ल्यबन्त अव्ययपदानि वर्गीकरोति ।
पाठभागान्तर्गतानां पदानां समानपदानि अमरकोशम् अनुसृत्य लिखति । 'स्म' उपयुज्य वाक्यनिर्माणं करोति।

DRAFT

**पठननैपुणिः** - उत्तमपौरबोधं परिचिनोति ।

**पाठस्य आमुखम्**

आधुनिककाले समूहे दया,अनुकम्पा, क्षमा, सहजीविस्नेहः इत्यादि मूल्यानां च्युतिः दृश्यते । तत्परिहाराय मूल्यबोधवर्धनात्मिकाः कथाः छात्रान् पाठयति । ततः आगामिनि काले उत्तमपौराणां वर्धनेन अद्यतनकाले समूहे प्राचल्यमानानां विपदां निर्मार्जनं साध्यं भवेत् ।समूहे सर्वेषां तुल्यनीतिः अवश्यमेव । तदर्थं छात्राणां मनसि सहजीविस्नेहं वर्धयितुम् अयं पाठः उपकरोति।

**प्रवेशकप्रवर्तनम्**

प्रथमचित्रे किं किं पश्यति ?

छात्राः किं कुर्वन्ति ?

कथं याने आरोहन्ति ?

द्वितीयचित्रे किं किं पश्यति ?

छात्राः किं कुर्वन्ति ?

कथं याने आरोहन्ति ?

पङ्क्तिशः वा?

अत्र उचितं चित्रं किम् ? कारणं किम् ?

छात्राणां पौरबोधमस्ति ।अतः ते पङ्क्तिशः यानम् आरोहन्ति । पौरबोधमधिकृत्य एकां कथां पठामः ।

**पठनप्रवर्त्तनानि :-**

**प्रवर्तनम् १**

DRAFT

उचितानुचितचयनम्

पाठपुस्तकस्थं चित्रं दृष्ट्वा उचितं वा अनुचितं वा इति लिखतु।

यथा -

अनुचितम् ।

उचितम्

उचितम् ।

**मूल्यनिर्णयसूचकाः**

निरीक्षणपाटवम्।

आशयावबोधः ।

**प्रवर्तनम् २**

**अर्थलेखनम्**

पाठभागं सम्यक् पठित्वा तत्रस्थानि नूतनपदानि चित्वा टिप्पणिपुस्तके लेखितुं प्रेरयति । प्रदत्तपदानाम् अर्थं शब्दकोशं निरीक्ष्य लेखितुं निर्दिशति।

| पदानि | समानपदानि |
|---|---|
| अवकरः | मालिन्यम् |
| स्कन्धः | अंसः |
| सम्मार्जकः | स्वच्छकारः |
| स्पृष्ट्वा | स्पर्शनं कृत्वा |
| स्वच्छता | शुद्धिः |

DRAFT

**मूल्यनिर्णयसूचकाः**

पदज्ञानम् ।

अर्थज्ञानम्।

**प्रवर्तनम् ३**

**चर्चा**

कथायां विद्यमानस्य ईश्वरचन्द्रविद्यासागरस्य प्रवृत्तिम् अधिकृत्य चर्चां करोतु । तदर्थम् अध्यापिका साहाय्यं करोति।

**मूल्यनिर्णयसूचकाः**

अर्थावगमनम्।

वाक्यघटना।

उचितपदप्रयोगः।

**प्रवर्तनम् ४**

पदच्छेदः

अध्यापिका कक्ष्यायां कानिचन उदाहरणानि चार्टपत्रे विलिख्य स्थापयति। तत् दृष्ट्वा पाठभागे प्रदत्तस्य प्रवर्तनस्य लेखनाय छात्रान् निर्दिशति।

यथा-

लिखन्नासीत् = लिखन् + आसीत् ।

चलन्नासीत् = चलन् + आसीत् ।

प्रकृतिरपि = प्रकृतिः + अपि ।

नेत्रयोरपि = नेत्रयोः + अपि ।

गच्छन्नासीत् = गच्छन् +आसीत् ।

DRAFT

वृत्तिरपि = वृत्तिः +अपि ।

**मूल्यनिर्णयसूचकाः**

उचितलेखनम्।

अर्थज्ञानम्।

पदज्ञानम्।

**प्रवर्तनम् ५**

पट्टिकां पूरयतु

| **त्त्वान्तम्** | **ल्यबन्तम्** |
| --- | --- |
| ज्ञात्वा<br>दृष्ट्वा<br>भूत्वा<br>पतित्वा<br>पठित्वा | आगत्य<br>उपक्रम्य<br>परिक्रम्य |

DRAFT

**प्रवर्तनम् ६**

पादटिप्पणीलेखनम्।

**चित्रं दृष्ट्वा** उचितवाक्यानि कोष्ठकात् चित्वा चित्रस्य अधःलिखतु ।

**मूल्यनिर्णयसूचकाः**

**निरीक्षणपाटवम्।**

अर्थावगमनम्।

**प्रवर्तनम् ७**

'स्म' उपयुज्य वाक्यपरिवर्तनं करोतु

वर्तमानकालक्रियापदेन सह 'स्म' प्रयुज्य भूतकालार्थं सूचयति ।

उदाहरणानि चार्टपत्रे/ICT विलिख्य प्रदर्शयति ।

अलिखत् - लिखति स्म

अक्रीडत् - क्रीडति स्म

अनमत् - नमति स्म

अहसत् - हसति स्म

अपिबत् - पिबति स्म

पाठभागे दत्तानि पदानि "स्म" प्रयुज्य लिखन्तु ।

क) उद्यानं पुष्पपूर्णं भवति स्म ।

ख) कृषकः वृषभं नयति स्म ।

ग) बालकः पाठं पठति स्म ।

घ) बालिका दन्तधावनं करोति स्म ।

**प्रवर्तनम् ८**

पुष्पमध्ये दत्तपदानां समानार्थक पदानि उपरि दत्तेभ्यःपदेभ्यः चित्वा पुष्पदलं पूरयतु ।

वस्त्रम् - आच्छादनं, वसनम्, अंशुकं, चेलम् ।

शरीरम् - वपुः, विग्रहः, संहननं, गात्रं, कायः ।

वैद्यः - भिषक्, चिकित्सकः, रोगहारी ।

DRAFT

प्रवर्तनम् ९

पट्टिकापूरणम्

उदाहरणानि दत्वा लट् - लङ् लकारयोः भेदान् बोधयति । तदनन्तरं पाठभागस्थ प्रवर्त्तनानि लेखितुं प्रेरयति ।

| लट् | लङ् |
|---|---|
| दर्शयति | अदर्शयत् |
| धावति | अधावत् |
| पचति | अपचत् |
| खादति | अखादत् |
| स्मरति | अस्मरत् |
| करोति | अकरोत् |
| पश्यति | अपश्यत् |
| नयति | अनयत् |
| पृच्छति | अपृच्छत् |

**संयोजकप्रवर्तनम्**

पौरबोधकाःतथा मूल्यबोधकाः कथाः चयनं कर्तुं छात्रान् प्रेरयति। इदानीं वयं मूल्यबोधात्मिकां कथां पठितवन्तः खलु? एतादृशाः केचनश्लोकाः अपि पठामः।

DRAFT

| पाठसंख्या - षष्ठः पाठः | पाठस्य नाम - सुभाषितानि |
|---|---|
| **प्रधानाशयः - मानविकता** | **उपाशयः - नीतिबोधः।** |
| **कालांशः - ८** | **व्यवहाररूपम् – सुभाषितानि।** |

**उद्देश्यानि / लक्ष्याणि** - सुभाषितेषु निहितानां मूल्यानां परिचायनम् ।

तालात्मकतया आशयव्यक्ततया च सुभाषितालपनम्।

**मूल्यः / मनोभावः** - उत्तमस्वभावरूपीकरणाय साहाय्यं करोति ।

सद्गुणदुर्गुणयोर्मिथः भेदं जानाति।

**पठन सामग्र्यः** - सुभाषित मुक्तावली ।

सूक्तिमुक्तावलिः।

सुभाषितावलिः ।

सुभाषितमञ्जरी ।

**पठनलक्ष्याणि** - समानपदचयनं, वाक्यरचना, सुभाषितस्य आशयलेखनं, सुभाषितसम्पुटनिर्माणम् च।

**पठननैपुणीः** - सुभाषितानि अधिकृत्य अधिकज्ञानं प्राप्नोति ।

**पाठस्य आमुखम्**

भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती ।
तस्यां हि काव्यं मधुरं तत्राऽपि च सुभाषितम् ॥ इति ।।

सुष्ठु भाषितं सुभाषितम् । स्नेहः, सम्पत्, दैनन्दिनजीवितं, समूहः, विद्यामहत्वम् इत्यादि विषयेषु सुभाषितानि सन्ति । अस्मिन् पाठभागे वृद्धजनोपदेश स्वीकरणस्य प्राधान्यं, सर्वभूतानां हितं,सत्यं,मानवानां षड्गुणाः च अन्तर्भवन्ति ।

DRAFT

**प्रवेशकप्रवर्तनम् ।**

श्लोकमिदं श्रुतं वा? कीदृशं श्लोकं श्रुतम् ?

काकः कृष्णः पिकः कृष्णःको भेद: पिककाकयो: ।

वसन्तकाले संप्राप्ते काकः काकः पिकः पिकः।।

अयं श्लोकः श्रुतः वा? एतादृशम् अर्थयुक्तं श्लोकमेव सुभाषितम् इत्युक्त्वा अध्यापिका पाठभागं प्रविशति ।

**पाठापग्रथनम्**

नीतिबोधात्मकानि कानिचन सुभाषितानि अस्मिन् पाठभागे अन्तर्भवति। वृद्धजनानाम् उपदेशमनुसरन् वृद्धिं प्राप्नोति । सर्वभूतानाम् अत्यन्तं हितकरं भवति सत्यम्। मनुष्याणां षट् गुणांश्च विशदीकरोति ।

**पठनप्रर्वतनानि**

**प्रवर्तनम् १**

सतालमालपनम्

छात्रान् सङ्घेषु कृत्वा श्लोकालपनाय निर्दिशति । वैयक्तिकरीत्या आलपनाय छात्रान् प्रेरयति। क्लेशपरिहाराय अध्यापिका साहाय्यं करोति ।

**मूल्यनिर्णयसूचका:**

अर्थावगमनम् ।

आशयव्यक्तता।

आलपनसामर्थ्यम् ।

DRAFT

**प्रवर्तनम् २**

अन्वयलेखनम्

पाठभागे लब्धानां सुभाषितानां अन्वयं लेखितुं प्रेरयति ।

**मूल्यनिर्णयसूचकाः।**

वाक्यघटना ।

आशयावगमनम् ।

**प्रवर्तनम् ३**

आशयलेखनम् ।

पाठभागस्थस्य सुभाषितस्य आशयं स्ववाक्यैः लेखितुं छात्रान् निर्दिशति । अध्यापिका क्लेशनिवारणं करोति ।

**मूल्यनिर्णयसूचकाः।**

अर्थावगमनम् ।

पदज्ञानम् ।

वाक्यघटना।

**प्रवर्तनम् ४**

सुभाषितलेखनम्

सत्यं,दानं,क्षमा,धैर्यम् इत्यादि विषयमधिकृत्य सुभाषितानां चयनं कृत्वा सम्पुटनिर्माणं करोतु।

**मूल्यनिर्णयसूचकाः**

विषयबन्धितम्।

अर्थयुक्तम्।

DRAFT

प्रवर्तनम् ५

पाठभागे विद्यमानं शब्दकोशं निरीक्ष्य दत्तानां पदानाम् अर्थं लिखतु।

अप्रिय: - न प्रियः

पथ्यः - पालनीयः

वचनम् - वाक्

हितम् - प्रियम्

धृतिः - धैर्यं

हातव्याः - त्याज्याः

प्रवर्तनम् ६

सुभाषितपङ्क्तिलेखनम्

"वृद्धजनानाम् अनुशासनम् अनुसरन् प्रियत्वं निश्चयेन प्राप्नोति" इति आशयपरं सुभाषितं चित्वा लिखतु।

DRAFT

अप्रियोऽपि हि पथ्यः स्या-
दिति वृद्धानुशासनम्।
वृद्धानुशासने तिष्ठन्
प्रियतामुपगच्छति ॥

प्रवर्तनम् ७

यथोचितं योजयतु ।

'क' मञ्जुषायां दत्तानां प्रश्नानाम् उचितमुत्तरं 'ख' मञ्जुषातः चित्वा लिखतु।

| क | ख |
|---|---|
| अप्रियः + अपि | अप्रियोऽपि |

| | |
|---|---|
| सत्यात् + आपि | सत्यादपि |
| षट्+ एव | षडेव |

**अनुबन्धः**

**क्षमा**

1. क्षमा दानं क्षमा यज्ञः

क्षमा सत्यं हि पुत्रिका।

क्षमा यशः क्षमा धर्मः

क्षमयाविष्ठितं जगत्।।

2. क्षमाशस्त्रं करे यस्य

दुर्जनः किं करिष्यति।

अतृणे परितो वह्निः

स्वयमेवोपशाम्यति।।

**धैर्यम्**

कदर्थितस्यापि हि धैर्यव्यत्ते-

र्न शक्यते धैर्यगुणाः प्रमार्ष्टुम्।

अधोमुखस्यापि कृतस्य वह्ने-

र्नाऽधः शिखा यान्ति कदाचिदेव।।

**सत्यम्**

अश्वमेधसहस्त्राणि

DRAFT

सत्यं च तुलया धृतम्।

अश्वमेधसहस्राद्धि

सत्यमेवाऽतिरिच्यते।।

**धैर्यम्**

रत्नैर्महाब्धेस्तुतुषुर्न देवाः

नभेजिरे भीमविषेण भीतिम्।

सुधां विना न प्रययुर्विरामम्

न निश्चितार्थाद्विरमन्ति धीराः।।

DRAFT